# नीतिवाणी

*सकलप्राणिषु मानवः श्रेष्ठः । तथापि समाजे सदा शान्तिः न परिलक्ष्यते । तत्र कारणं तावत् मानवस्य लोभः मोहः अविवेकिता चापि । महापुरुषाः मानवसमाजस्य दोषं दृष्ट्वा तेषां दूरीकरणार्थं नीतिवाक्यानि रचयन्ति । तानि नीतिवाक्यानि रत्नसदृशानि भवन्ति । संस्कृतनीतिकारेषु चाणक्य-भर्तृहरि-मनु-व्यास-वाल्मीकि-कामन्दक-पराशर-शंकरप्रभृतयः प्रसिद्धाः । तैः रचितेभ्यः नीतिरत्नेभ्यः कानिचित् अत्र संगृहीतानि । तानि अस्माकम् अज्ञानान्धकारदूरीकरणाय प्रदीपाः इव विभान्ति ।*

१. जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स क्रमः सर्वविद्यानां धनस्य च धर्मस्य च ।।

२. उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ।।

३. नारिकेलसमाकारा दृश्यन्तेऽपि हि सज्जनाः ।
अन्ये वदरिकाकारा बहिरेव मनोहराः ।।

४. विना कार्येण ये मूढा गच्छन्ति परमन्दिरम् ।
अवश्यं लघुतां यान्ति कृष्णपक्षे यथा शशी ।।

५. परोपकाराय फलन्ति वृक्षाः
परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः
परोपकारार्थमिदं शरीरम् ।

६. नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जनाः ।
शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन ।

७. मलयाचलगन्धेन त्विन्धनं चन्दनायते ।
तथा सज्जनसंगेन दुर्जनः सज्जनायते ।।

८. रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।

९. दुर्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चौराणामनृतं बलम् ।।

१०. अकृत्यं नैव कर्त्तव्यं प्राणत्यागेऽपि संस्थिते ।
न च कृत्यं परित्याज्यमेष धर्मः सनातनः ।।

११. हिंसाबलमसाधूनां राज्ञां दण्डविधिर्बलम् ।
शुश्रूषा च बलं स्त्रीणां क्षमा गुणवतां बलम् ।।

१२. स्वभावं न जहात्येव साधुरापद्गतोऽपि सन् ।
कर्पूरः पावकस्पृष्टः सौरभं लभतेतराम् ।।

१३. अहिंसा परमो धर्मस्तथाहिंसा परं तपः ।
अहिंसा परमं सत्यं यतो धर्मः प्रवर्त्तते ।।

१४. सुखस्य दुःखस्य न कोऽपि दाता
परो ददातीति कुबुद्धिरेषा ।
अहं करोमीति वृथाभिमानः
स्वकर्मसूत्रैर्ग्रथितो हि लोकः ।।

१५. क्षुद्रेऽपि निहिता शक्तिः सम्भावना महीयसी ।
क्षुद्रबीजान्महाकाय-वटवृक्षस्य सम्भवः ।।

१६. भेदभावं परित्यज्य जातिधर्मादिहेतुकम् ।
सहावस्थानमेकत्र कर्त्तव्यं शान्तिकामिभिः ।।

१७. मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ।।

१८. दिनान्ते च पिबेद् दुग्धं निशान्ते च पिबेत् पयः ।
भोजनान्ते पिबेत्तक्रं किं वैद्येन प्रयोजनम् ।।

१९. दुर्जनः परिहर्त्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ।।

२०. शतं विहाय भोक्तव्यं सहस्रं स्नानमाचरेत् ।
लक्षं विहाय दातव्यं कोटिं त्यक्त्वा हरिं भजेत् ।।

२१. मनसा चिन्तितं कर्म वचसा न प्रकाशयेत् ।
अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ।।

२२. उत्साहः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र तिष्ठन्ति तत्र देवः सहायकः ।।

२३. उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ।।

२४. क्षमाधनुः करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।।

२५. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।

२६. धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।

२७. मक्षिका व्रणमिच्छन्ति धनमिच्छन्ति पार्थिवाः ।
नीचाः कलहमिच्छन्ति शान्तिमिच्छन्ति साधवः ।।

२८. नास्ति विद्यासमो बन्धुर्नास्ति सत्यसमं तपः ।
नास्ति रोगसमं दुःखं नास्ति त्यागसमं सुखम् ।

## टिप्पणी

पूर्यते - ପୂର୍ଣ୍ଣହୁଏ (पूर्णं भवति) । घटः - ମାଠିଆ (कलसः) । प्रज्ञा - ପରିପକ୍ୱଜ୍ଞାନ (परिपक्वं ज्ञानम्) । हि - ଯେହେତୁ (यतः) । पयः - ଦୁଗ୍ଧ (दुग्धम्) । भुजङ्गानाम् - ସାପମାନଙ୍କର (सर्पाणाम्) । नारिकेलसमाकाराः - ନଡ଼ିଆସଦୃଶ (नारिकेलसदृशाः) । सज्जनाः - ସାଧୁଲୋକମାନେ (साधुजनाः) । वदरिकाकाराः - ବରକୋଳିପରି (वदरिकाफलसदृशाः) । मनोहराः - ସୁନ୍ଦର (रमणीयाः) । मूढाः - ମୂର୍ଖମାନେ (मूर्खाः) । परमन्दिरम् - ଅନ୍ୟ ଘରକୁ (अन्यस्य गृहम्) । लघुतां यान्ति - ଛୋଟ ହୁଅନ୍ତି (हीनाः भवन्ति) । शशी - ଜହ୍ନ (चन्द्रः) । परोपकाराय - ଅନ୍ୟର ଉପକାର ପାଇଁ (अन्यस्य उपकारनिमित्तम्) । नमन्ति - ନଇଁପଡ଼ନ୍ତି (नम्राः भवन्ति) । फलिनः - ଫଳିଥିବା (फलयुक्ताः) । कदाचन - କେବେହେଲେ (कदापि) । इन्धनम् - ଜାଳେଣି (जालेणि इति भाषायाम्) । मलयाचलः

- ମଳୟ ପର୍ବତ (मलयगिरि:) । निर्गन्धा: - ଗନ୍ଧହୀନ (गन्धहीना:) । किंशुका: - ପଳାଶଗଛ (पलाशवृक्षा:) । रोदन - କ୍ରନ୍ଦନ (क्रन्दनम्) । अनृतम् - ମିଛ (मिथ्या / मृषा) । अकृत्यम् - ଅକାର୍ଯ୍ୟ (अकार्यम्) । कृत्यम् - କରଣୀୟ (कार्यम्) । राज्ञाम् - ରାଜାମାନଙ୍କର ((नृपाणाम्) । शुश्रूषा - ସେବା (सेवा) । गुणवताम् - ଗୁଣୀଲୋକମାନଙ୍କର (गुणिजनानाम्) । जहाति - ତ୍ୟାଗକରେ (त्यजति) । पावकस्पृष्ट: - ଅଁଗ୍ନିସ୍ପୃଷ୍ଟ (अग्निना स्पृष्ट:) । सौरभम् - ସୁବାସ (सुगन्ध:) । परमम् - ଶ୍ରେଷ୍ଠ (श्रेष्ठम्) । यत: - ଯେଣୁ (येन कारणेन) । कुबुद्धि: - ମନ୍ଦବୁଦ୍ଧି (कुत्सिता बुद्धि:) । वृथाभिमान: - ବୃଥା ଅହଙ୍କାର (वृथा गर्व:) । महीयसी - ଶ୍ରେଷ୍ଠ (श्रेष्ठा) । एकत्र - ଏକାଠି (एकस्मिन् स्थाने) । मनसि - ମନରେ (मानसे) । वचसि - କଥାରେ (वचने) । दुरात्मनाम् - ଦୁଷ୍ଟମାନଙ୍କର (खलानाम्) । पय: - ପାଣି (जलम्) । तक्रम् - ଦହି (दधि) । भूषित: - ଅଳଙ୍କୃତ (अलङ्कृत:) । विहाय - ଛାଡ଼ି (त्यक्त्वा) । पराक्रम: - ବୀରତ୍ୱ (वीरत्वम्) । उपशाम्यति - ଲିଭିଯାଏ (उपशान्त: भवति) । पूज्यन्ते - ପୂଜାପା'ନ୍ତି (सम्मानिता: भवन्ति) ।

## अभ्यास:

1. **निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

   (क) मूढ़ा: केन लघुतां यान्ति ?

   (ख) के नमन्ति, के च न नमन्ति ?

   (ग) सनातन: धर्म: क: ?

   (घ) केषां बलं किम् ?

   (ङ) कथं दुर्जन: परिहर्त्तव्य: ?

   (च) मनसा चिन्तितं कर्म कथं वचसा न प्रकाशयेत् ?

   (छ) के किम् इच्छन्ति ?

   (ज) कदा किं पिबेत् ?

   (झ) महात्मनां दुरात्मनां च मध्ये क: भेद: ?

   (ञ) कथं क्षुद्रेऽपि निहिता शक्ति: सम्भावना महीयसी ?

   (ट) सर्वविद्यानां क: क्रम: ?

   (ठ) परोपकाराय के किं कुर्वन्ति ?

2. **निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) लोक: कै: ग्रथित: ?

(ख) केषामुपदेश: प्रकोपाय भवति ?

(ग) भुजङ्गानां पय: पानं केवलं किं भवति ?

(घ) नारिकेलसमाकारा: के दृश्यन्ते ?

(ङ) परोपकाराय वृक्षा: किं कुर्वन्ति ?

(च) नद्य: परोपकाराय किं कुर्वन्ति ?

(छ) इदं शरीरं किमर्थम् ?

(ज) कीदृशा: वृक्षा: नमन्ति ?

(झ) सज्जनसंगेन क: सज्जनायते ?

(ञ) राजा कस्य बलम् ?

(ट) मूर्खस्य बलम् किम् ?

(ठ) बालानां बलं किम् ?

(ड) क: परम: धर्म: ?

(ढ) परमं सत्यं किम् ?

(ण) मनसा चिन्तितं कर्म केन च प्रकाशयेत् ?

(त) सहस्रं विहाय किमाचरेत् ?

(थ) कोटिं त्यक्त्वा कं भजेत् ?

(द) भोजनान्ते किं पिबेत् ?

3. **सन्धिविच्छेदं कुरुत ।**

नास्ति, व्रणमिच्छन्ति, दमोऽस्तेयम्, नार्यस्तु, स्वयमेव, चास्ति, सिर्द्धिन, स्नानमाचरेत्, मनस्तापम् ।

4. **सन्धिं कुरुत ।**

सम् + भावना, मनसि + एकम्, वचसि + एकम्, क्षुद्रे + अपि, अल्पानाम् + अपि, न + एव, गत: + अपि, बाल: + न, दृश्यन्ते + अपि, वहि: + एव ।

5. **वाक्यानि रचयत ।**

अपि, एव, यथा, च, कदाचन, तथा, कर्त्तव्यम्, परम्, यत:, त्यक्त्वा ।

6. **शुद्धम् उत्तरं निरूपयत ।**

(क) के नारिकेलसमाकारा: दृश्यन्ते ?

(i) दुर्जना: (ii) गुरुजना:

(iii) सज्जना: (iv) जना:

(ख) के न नमन्ति ?

(i) वृक्षा: (ii) पुष्पवृक्षा:

(iii) गुणिन: (iv) शुष्कवृक्षा:

(ग) मक्षिका: किमिच्छन्ति ?

(i) धनम् (ii) पुष्परसम्

(iii) व्रणम् (iv) कलहम्

(घ) कियत् विहाय दातव्यम् ?

(i) कोटिम् (ii) लक्षम्

(iii) सहस्रम् (iv) शतम्

(ङ) कदा दुग्धं पिबेत् ?

(i) निशान्ते (ii) भोजनान्ते

(iii) दिनान्ते (iv) शयनान्ते

7. **शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) पार्थिवा: ____________ इच्छन्ति ।

(ख) ____________ कलहो नास्ति ।

(ग) किं ____________ प्रयोजनम् ।

(घ) ____________ गुणवतां बलम् ।

(ङ) परोपकाराय वहन्ति ____________ ।

| मौनिन:, क्षमा, नद्य:, धनम्, वैद्येन |
| --- |

●●●